हनुमत्पंचरत्नं

हनुमत्पंचरत्नं

वीताखिलविषयेच्छं जातानंदाश्रुपुलकमत्यच्छं |
सीतापतिदूताद्यं वातात्मजमद्य भावये हृद्यं || 1 ||

तरुणारुणमुखकमलं करुणारसपूरपूरितापांगं |
संजीवनमाशासे मंजुलमहिमानमंजनाभाग्यं || 2 ||

शंबरवैरिशरातिगमंबुजदल विपुललोचनोदारं |
कंबुगलमनिलदिष्टं बिंबज्वलितोष्ठमेकमवलंबे || 3 ||

दूरीकृतसीतार्तिः प्रकटीकृतरामवैभवस्फूर्तिः |
दारितदशमुखकीर्तिः पुरतो मम भातु हनुमतो मूर्तिः || 4 ||

वानरनिकराध्यक्षं दानवकुलकुमुदरविकरसदृशं |
दीनजनावनदीक्षं पवनतपः पाकपुंजमद्राक्षं || 5 ||

एतत्पवनसुतस्य स्तोत्रं यः पठति पंचरत्नाख्यं |
चिरमिह निखिलान्भोगान्भुंक्त्वा श्रीरामभक्तिभाग्भवति || 6 ||

इति श्रीमच्छंकराचार्य कृतौ हनुमत्पंचरत्नं |